श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमदध्यात्मरामायणे बालकाण्डे अहल्या कृतं

# ॥ श्रीरामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामस्तोत्रम् ॥

अहल्योवाच

अहो कृतार्थास्मि जगन्निवास ते
पादाब्जसंलग्नरजःकणादहम्।
स्पृशामि यत्पद्मजशङ्करादिभिः
विमृग्यते रन्धितमानसैः सदा॥ 1 ॥

अहो विचित्रं तव राम चेष्टितं
मनुष्यभावेन विमोहितं जगत्।
चलस्यजस्रं चरणादिवर्जितः
सम्पूर्ण आनन्दमयोऽतिमायिकः॥ 2 ॥

यत्पादपङ्कजपरागपवित्रगात्रा
भागीरथी भवविरिञ्चिमुखान्पुनाति।
साक्षात्स एव मम दृग्विषयो यदास्ते
किं वर्ण्यते मम पुराकृतभागधेयम्॥ 3 ॥

मर्त्यावतारे मनुजाकृतिं हरिं
रामाभिधेयं रमणीयदेहिनम्।
धनुर्धरं पद्मविशाललोचनं
भजामि नित्यं न परान् भजिष्ये॥ 4 ॥

यत्पादपङ्कजरजः श्रुतिभिर्विमृग्यं
यन्नाभिपङ्कजभवः कमलासनश्च।

यन्नामसाररसिको भगवान्पुरारिः
    तं रामचन्द्रमनिशं हृदि भावयामि ॥ 5 ॥

यस्यावतारचरितानि विरिञ्चिलोके
    गायन्ति नारदमुखा भवपद्मजाद्याः ।
आनन्दजाश्रुपरिषिक्तकुचाग्रसीमा
    वागीश्वरी च तमहं शरणं प्रपद्ये ॥ 6 ॥

सोऽयं परात्मा पुरुषः पुराण
    एकः स्वयंज्योतिरनन्त आद्यः ।
मायातनुं लोकविमोहनीयां
    धत्ते परानुग्रह एष रामः ॥ 7 ॥

अयं हि विश्वोद्भवसंयमानाम्
    एकः स्वमायागुणबिम्बितो यः ।
विरिञ्चिविष्ण्वीश्वरनाम भेदान्
    धत्ते स्वतन्त्रः परिपूर्ण आत्मा ॥ 8 ॥

नमोऽस्तु ते राम तवाङ्घ्रिपङ्कजं
    श्रिया धृतं वक्षसि लालितं प्रियात् ।
आक्रान्तमेकेन जगत्त्रयं पुरा
    ध्येयं मुनीन्द्रैरभिमानवर्जितैः ॥ 9 ॥

जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः ।
सर्वभूतेष्वसंयुक्त एको भाति भवान्परः ॥ 10 ॥

ओंकारवाच्यस्त्वं राम वाचामविषयः पुमान् ।
वाच्यवाचकभेदेन भवानेव जगन्मयः ॥ 11 ॥

कार्यकारणकर्तृत्वफलसाधनभेदतः।
एको विभासि राम त्वं मायया बहुरूपया ॥ **12** ॥

त्वन्मायामोहितधियः त्वां न जानन्ति तत्त्वतः।
मानुषं त्वाभिमन्यन्ते मायिनं परमेश्वरम् ॥ **13** ॥

आकाशवत्त्वं सर्वत्र बहिरन्तर्गतोऽमलः।
असङ्गो ह्यचलो नित्यः शुद्धो बुद्धः सदव्ययः ॥ **14** ॥

योषिन्मूढाहमज्ञाते तत्त्वं जाने कथं विभो।
तस्मात्ते शतशो राम नमस्कुर्यामनन्यधीः ॥ **15** ॥

देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा।
त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे ॥ **16** ॥

नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्सल।
नमस्तेऽस्तु हृषीकेश नारायण नमोऽस्तुते ॥ **17** ॥

भवभयहरमेकं भानुकोटिप्रकाशं
    करधृतशरचापं कालमेघावभासम्।
कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं
    कमलविशदनेत्रं सानुजं राममीडे ॥ **18** ॥

स्तुत्वैवं पुरुषं साक्षात् राघवं पुरतः स्थितम्।
परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ पतिम् ॥ **19** ॥

अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः।
स मुच्यतेऽखिलैः पापैः परं ब्रह्माधिगच्छति ॥ **20** ॥

पुत्राद्यर्थे पठेद्भक्त्या रामं हृदि निधाय च।
संवत्सरेण लभते वन्ध्या अपि सुपुत्रकम् ॥ **21** ॥

सर्वान्कामानवाप्नोति रामचन्द्रप्रसादतः ॥ **22** ॥

ब्रह्मघ्नो गुरुतल्पगोऽपि पुरुषः स्तेयी सुरापोऽपि वा
मातृभ्रातृविहिंसकोऽपि सततं भोगैकबद्धातुरः।
नित्यं स्तोत्रमिदं जपन् रघुपतिं भक्त्या हृदिस्थं स्मरन्
ध्यायन् मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः ॥ **23** ॥

॥ श्रीरामस्तोत्रं समाप्तम् ॥